स्वत्वं निपातितश्च ।) मनः । इत्यमरः ।१।४।३१ ॥ (यथा, भट्टिः । ६ । २२ ।

"तस्यालिपत शोकाग्निः स्वान्तं काष्ठमिव ज्वलन् ।
श्रसिसेवानिलः शीतो वने तं न त्वजिह्रदत् ॥")

गह्वरम् । इति मेदिनी ॥ (स्वस्य श्रन्ते, पुं, क्ली । यथा, भागवते ।२ । ६ । ३४ ।

"यो ह्यात्ममायाविभवश्च पर्य्यगाद्
यथा नभः स्वान्तमथापरे कुतः ॥")

शब्दिते, त्रि ॥

स्वापः, पुं, (स्वप + घञ् ।) निद्रा । इत्यमरः । १ । ७ । ३६ ॥ (यथा, भागवते ।३।२६।२९।

"संशयोऽथ विपर्य्यासो निश्चयः स्मृतिरेव च ।
स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक् ॥")

शयनम् । स्पर्शाज्ञता । अज्ञानम् । इति विश्व-मेदिन्यौ ॥ (विषयोऽस्य यथा,—

"सर्व्वर्त्तुषु दिवास्वापः प्रतिषिद्धोऽन्यत्र ग्रीष्मात् ॥"
इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये ॥)

स्वापतेयं, क्ली, (स्वपतौ धनस्वामिनि साधुः । स्वपति + "पथ्यातिथिवसतिस्वपतेर्ढञ् ।" ४ । ४ । १०४ । इति ढञ् । स्वागतादित्वाच्चैजागमः ।) धनम् । इत्यमरः । २ । ८ । ९० ॥ (यथा, माघे । १४ । ८ ।

"स्वापतेयमधिगम्य धर्म्मतः
पर्य्यपालयमवीवृधच्च यत् ।
तीर्थगामि करवै विधानतः
स्तज्जुषस्व जुहवानि चानले ॥")

स्वापदः, पुं, (श्वापदः । पृषोदरादित्वात् साधुः ।) श्वापदः । इति हलायुधः ॥

स्वाभाविकः, त्रि, (स्वभावे भवः । स्वभाव + ठक् । स्वभावसिद्धः । स्वभावत उत्पन्नः । यथा,—

"शैत्यं नाम गुणस्तवैव सहजः स्वाभाविकी स्वच्छता
किं ब्रूमः शुचितां भवन्ति शुचयः स्पर्शेन यस्यापरे ।
किञ्चान्यत् कथयामि ते स्तुतिपदं त्वं जीविनां जीवनं
त्वञ्चेन्नीचपथेन गच्छसि पयः कस्त्वां निषेद्धुं क्षमः ॥"

इति वल्लालसेनं प्रति लक्ष्मणसेनप्रेरितश्लोकः ॥ (व्याधिप्रकारभेदः । यथा,—

"तद्दुःखसंयोगा व्याधय इत्युच्यन्ते । चतुर्व्विधाः आगन्तवः शारीरा मानसाः स्वाभाविकाश्चेति । स्वाभाविकाः क्षुत्पिपासाजरामृत्यु-निद्राप्रभृतयः ॥" इति सुश्रुते सूत्रस्थाने प्रथमेऽध्याये ॥)

स्वामिजङ्घी, [न] पुं, परशुरामः । इति शब्द-माला ॥

स्वामी, [न्]त्रि, (स्वमस्यास्तीति। स्व + "स्वामिन्नैश्वर्य्ये ।" ५ । २ । १२६ । इति आमिन्प्रत्ययेन निपातितः ।) अधिपतिः । तत्पर्य्यायः । ईश्वरः २ पतिः ३ ईशिता ४ अधिभूः ५ नायकः ६ नेता ७ प्रभुः ८ परिवृढः ९ अधिपः १० । इत्यमरः । ३ । १ । १० ॥ अधमतिः ११ ईशः १२ आर्य्यः १३ । इति जटाधरः ॥ पालकः १४ । इति शब्दरत्नावली ॥

स्वामी, [न्] पुं, (स्वमस्यास्तीति । स्व + आमिन् ।) कार्त्तिकेयः । इति मेदिनी ॥ राजा । यथा,—

"स्वाम्यमात्यः सुहृत् कोषो राष्ट्रदुर्गबलानि च ।
राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि च ॥"
इत्यमरः । २ । ८ । १७ ॥

विभुः । हरः । हरिः । इति शब्दरत्नावली ॥ गुरुः । भर्त्ता । इति धरणिः ॥ वात्स्यायनमुनिः । इति त्रिकाण्डशेषः ॥ गरुड़ः । इति केचित् ॥ अतीतकल्पीयार्हद्भेदः । इति हेमचन्द्रः ॥ परम-हंसः । यथा, श्रीधरस्वामिप्रभृतयः ॥ * ॥ स्वाम्यर्थमरणफलं यथा, वह्निपुराणे संग्राम-प्रशंसानामाध्याये ।

"शृङ्गिभिर्दंष्ट्रिभिर्व्वापि तथा म्लेच्छैश्च तस्करैः ।
स्वाम्यर्थे ये हता राजन् तेषां स्वर्गो न संशयः ॥
हते गोस्वामिविप्रार्थे नरमेधफलं हि तत् ॥"

स्वामिप्रशंसा यथा,—

"स्त्रीगर्व्वः पतिसौभाग्याद्वर्द्धते च दिने दिने ।
सुस्त्री चेद्विभवो यस्मात्तं भजेद्धर्म्मतः सदा ॥
पतिर्बन्धुः कुलस्त्रीणामधिदेवः सदा पतिः ।
परं सम्पत्स्वरूपश्च सुखरूपश्च मूर्त्तिमान् ॥
धर्म्मदः सुखदः शश्वत् प्रीतिदः शान्तिदः सदा ।
सम्मानदो मानदश्च मान्यश्च मानखण्डनः ॥
सारात्सारतमः स्वामी बन्धूनां बन्धुदर्शनः ।
न च भर्त्तुः समो बन्धुर्बन्धोर्बन्धुषु दृश्यते ॥
भरणादेव भर्त्तारं पालनात् पतिरुच्यते ।
शरीरेशाच्च स स्वामी कामदात् कान्त उच्यते ।
बन्धुश्च सुखबन्धाच्च प्रीतिदानात् प्रियः परः ।
ऐश्वर्य्यदानादीशश्च प्राणेशात् प्राणनायकः ॥
रतिदानाच्च रमणः प्रियो नास्ति प्रियात् परः ।
पुत्त्रस्तु स्वामिनः शुक्रात् जायते तेन स प्रियः ॥
शतपुत्रात् परः स्वामी कुलजानां प्रियः सदा ।
असत्कुलप्रसूता या कान्तं विज्ञातुमक्षमा ॥
स्नानञ्च सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षणम् ।
प्रादक्षिण्यं पृथिव्याश्च सर्व्वाणि च तपांसि च ॥
सर्व्वाण्येव व्रतानीति महादानानि यानि च ।
उपोषणानि पुण्यानि शान्यन्यानि च विश्वतः ॥
गुरुसेवा विप्रसेवा देवसेवादिकञ्च यत् ।
स्वामिनः पादसेवायाः कलां नार्हन्ति षोड़शीम् ॥
गुरुविप्रेष्टदेवेषु सर्व्वेभ्यश्च पतिर्गुरुः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे । ४२ । २०—३० ॥

स्वाम्युपकारकः, पुं, (स्वामिन उपकारकः ।) अश्वः । इति केचित् ॥ प्रभुहितकारके, त्रि ॥

स्वायम्भुवः, पुं, (स्वयम्भुवोऽपत्यमिति । स्वयम्भू + अण् । संज्ञापूर्व्वकस्य विधेरनित्यत्वात् न गुणः ।) प्रथममनुः । स च सृष्टिहेतवे ब्रह्मणो दक्षिणाङ्गाज्जातः । वामाङ्गात् शतरूपा स्त्री तस्य महिषी आसीत् । अस्मिन्मन्वन्तरे यज्ञोऽवतारः स एव इन्द्रः । यमादयो देवाः मरीच्यादिसप्तर्षयः । स्वायम्भुवो मनुः । प्रियव्रतोत्तानपादौ मनुपुत्त्रौ । आकूतिः देवहूतिः प्रसूतिः कन्याः । इति श्रीभागवतमतम् ॥ * ॥ अपि च ।

"यामा नाम पुरा देवाः आसन् स्वायम्भुवेऽन्तरे ।
सप्तैव ऋषयः पूर्व्वं ये मरीच्यादयः स्मृताः ॥
अग्निध्रश्चाग्निबाहुश्च विभुः सवन एव च ।
ज्योतिष्मान् द्युतिमान् हव्यो मेधा मेधातिथिर्व्वसुः ॥
स्वायम्भुवस्यास्य मनोर्दशैते वंशवर्द्धनाः ।
प्रतिसर्गममी कृत्वा जग्मुस्ते परमं पदम् ॥
एतत् स्वायम्भुवं प्रोक्तं स्वारोचिषमतः परम् ॥"
इति मात्स्ये । ९ । ३—६ ॥ * ॥

अपरञ्च ।

"ततो ब्रह्मात्मसंभूतं पूर्व्वं स्वायम्भुवं प्रभुः ।
आत्मनः सदृशं चक्रे प्रजापाल्ये मनुं तदा ॥
शतरूपाञ्च तां नारीं तपोनिर्धूतकल्मषाम् ।
स्वायम्भुवो मनुर्देवः पत्नीत्वे जगृहे प्रभुः ॥
तस्माच्च पुरुषात् पुत्त्री शतरूपा व्यजायत ।
प्रियव्रतोत्तानपादौ प्रख्यातावात्मकर्म्मभिः ॥
कन्ये द्वे च तथाकूतिः प्रसूतिश्च ततः पिता ।
ददौ प्रसूतिं दक्षाय तथाकूतिं रुचेः पुरा ॥
प्रजापतिः स जगृहे तयोर्यज्ञः सदक्षिणः ।
पुत्त्रो जज्ञे महाभागः दम्पत्योर्मिथुनं ततः ॥
यज्ञस्य दक्षिणायास्तु पुत्त्रा द्वादश जज्ञिरे ॥
यामा इति समाख्याता देवाः स्वायम्भुवेऽन्तरे ।
तस्य पुत्त्रास्तु यज्ञस्य दक्षिणायां सुभास्वराः ॥
प्रसूत्याञ्च तथा दक्षसुतस्तो विंशतिस्तथा ।
ससर्ज कन्यास्तासान्तु सम्यक् नामानि मे शृणु ॥"

इति मार्कण्डेयपुराणे दुःसहशासननामाध्यायः ॥ (तत्सम्बन्धिनि, त्रि । यथा, हरिवंशे । ७ । ९ ।

"यामा नाम तथा देवा आसन् स्वायम्भुवेऽन्तरे ॥"

ब्रह्मसम्बन्धिनि च त्रि । यथा, कुमारे ।२।१।

"तस्मिन् विप्रकृताः काले तारकेण दिवौकसः ।
तुरासाहं पुरोधाय धाम स्वायम्भुवं ययुः ॥")

स्वायम्भुवमनुपिता, [तृ] पुं, (स्वयम्भुवमनोः पिता ।) ब्रह्मा । इति पुराणम् ॥

स्वायम्भुवी,) स्त्री, (स्वयम्भुव इयमिति ।अण् । ङीष् ।) ब्राह्मी । इति राजनिर्घण्टः ॥

स्वराट्, [ज] पुं, (स्वः स्वर्गे राजते इति । राज् + क्विप् ।) इन्द्रः । इत्यमरः । १ । १ । ४६ ॥

स्वारोचिषः, पुं, (स्वरोचिषोऽपत्यमिति । अण् ।) द्वितीयो मनुः । अस्मिन् मन्वन्तरे विभुरवतारः । रोचन इन्द्रः । तुषितादयो देवाः । ऊर्ज्जस्तम्भादयः सप्तर्षयः । अग्निसुतः स्वारोचिषो मनुः । द्युमत्सुषेणरोचिष्मत्प्रमुखा मनुपुत्त्राः । इति श्रीभागवतमतम् ॥ अपि च ।

"स्वारोचिषस्य तनयाश्चत्वारो देववर्च्चसः ।